# संस्कृतसेविता भारतमाता

डा: पि. वन्दोपाध्याय:

वितरति हर्षं		भारतवर्षम्
अस्माकं जननी,
किरीटमण्डिता		सागरसेविता
धन्या तया धरणी ।।१।।

श्यामकेदारे		सरित: तीरे
सलीलं मलयो वाति
मधुरं मधुरं		कोकिलकूजनं
दूरात् दूरं याति ।।२।।

अतिप्राचीना		नित्यनवीना
संस्कृतगङ्गाधारा,
ललितं ललितं		चलति रुचिरं
सकलमङ्गलसारा ।।३।।

प्रज्ञाप्रकाशा		संस्कृता भाषा
संहतिरक्षाशीला,
अतीव सरला		कोमलतरला
भारती कण्ठे माला ।।४।।

वेदं शास्त्रं		शान्तिं शस्त्रं
कलयति बहु धीरम्,
संस्कृत-सेवित:		भारतदेश:
जयतु जयतु चिरम् ।।५।।

